# वंदे वंदे शक्तिदुर्गां

*राग : वकुळाभरणं        ताळं : आदि*

<u>पल्लवि :</u>

वंदे वंदे शक्ति दुर्गां
पालित संतत नतवर्गां

<u>चरणः</u>

महिष निहंत्रीं श्री दुर्गां
चंद्रकलापां जय दुर्गां
भय संहर्त्रीं वन दुर्गां
सूदित दैत्यां सुख दुर्गां ...१

शुभकरणां शूलिनि दुर्गां
शिवमुदितां तां शिवदुर्गां
शांतिकरीं तां शान्ति दुर्गां
शाबरशक्तिं शबरि दुर्गां ...२

देवीं जात - वेददुर्गां
ज्वलितात्मानं ज्वलदुर्गां
लावण्याढ्यां लवण दुर्गां
ज्योतीरूपां दीपदुर्गां ...३

असुर निहंत्रीं असुरदुर्गां
अमर सवित्रीं अमरदुर्गां
घनवैभवदां कनकदुर्गां
नानारूपां नवदुर्गां ...४

दुर्गति शमनीं दुं दुर्गां
सच्चिदानंदां गुरु दुर्गां ...५